CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13.
Coll. No. 360

Title Gangāsāhastra nāma

360

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 360. Subject: Stotra.

Title: Gangā sahastra nāma

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 8" by 4.8" Extent: 28 foll.

Language: Sanskrit. Script: Devanagari

Remarks:

॥श्रीगणेशायनमः॥श्रीगंगायैनमः॥ ॥अगस्त्यउवा
च॥ ॥विनास्नानेनगंगायांनृणांजन्मनिरर्थकं॥
उपायांतरमस्त्यन्यद्येनस्नानफलंलभेत्॥१॥
अशक्तानांचपंगूनामालस्योपहतात्मनां॥दूरदे
शांतरस्थानांगंगास्नानकथंभवेत्॥२॥दानंवा
थव्रतंवाथमंत्रस्तोत्रंजपोथवा॥तीर्थांतराभिषे
कोवादेवतोपासनंतुवा॥३॥यद्यस्तिकिंचित्षड्

क्षगंगास्नानफलप्रदं॥विधानांतरमंत्रैशतद्वद
प्रणतायमे॥४॥त्वत्तोनवेदस्कंदान्योगंगागर्भस
मुद्भव॥परंस्वर्गतरंगिण्यामहिमानंमहामते॥५॥
स्कंदउवाच॥ ॥संतिपुण्यजलानीहसरांसिसरि
तोमुने॥स्थानेस्थानेचतीर्थानिजितात्माध्युषितानि
च॥६॥दृष्टप्रत्ययकारीणिमहामहिमभांज्यपि॥
परंस्वर्गतरंगिण्याःकोट्यंशोपिनतत्रवै॥७॥अनेनै

वाङ्मानेनबुद्ध्यस्वकजशोद्भव॥दृष्टेगंगोत्तमांगेन
देवदेवेनशंभुना॥८॥स्नानकालेन्यतीर्थेषुजप्यतेजा
ह्नवीजनैः॥विनाविष्णुपदींकान्यत्समर्थमघशोध
ने॥९॥गंगास्नानफलंब्रह्मन्‌गंगायामेवलभ्यते॥
यथाद्राक्षाफलास्वादोद्राक्षायामेवनान्यतः॥१०॥
अस्त्युपायइहत्वेकःस्याद्येनाविकलंफलं॥स्नान २
स्यदेवसरितोमहागुह्यतमोमुने॥११॥शिवभक्ताय

शांतायविष्णुभक्तिपरायच॥श्रद्धालवेत्वास्तिकाय
गर्भवासमुमुक्षवे॥१२॥कथनीयंनचान्यस्यकस्य
चित्‌केनचित्‌क्वचित्‌॥इदंरहस्यंपरमंमहापात
कनाशनं॥१३॥महाश्रेयस्करंपुण्यंमनोरथकरंप
रं॥द्युनदीप्रीतिजनकंशिवसंतोषसंतति॥१४॥
नाम्नांसहस्रंगंगायाःस्तवराजेषुशोभनं॥जप्यानां
परमंजप्यंवेदोपनिषदासमं॥१५॥जपनीयंप्रयत्ने

नमोनिनावाचकंविना॥ स्तुतिस्थानेषुस्तुतिनांस्पृष्टा सु१
हरमेवच॥१६॥ ॥स्कंद उवाच॥ ॥ॐनमोगंगादेव्यै
ॐनमःशिवायैश्रीगंगायैनमः॥ ॐकाररूपिण्यजरा
तुलानंतामृतस्रवा॥१७॥ अत्युदाराभयाशोकालक
नंदामृतामला॥ अनाथवत्सलामोघापांयोनिरमृत
प्रदा॥१८॥ अव्यक्तलक्षणाक्षोभ्यानवछिन्नापराजि ३
ता॥ अनाथनाथनीष्टार्थसिद्धिदानंगवर्द्धिनी॥१९॥

अणिमादिगुणाधाराग्रगण्यालीकहारिणी॥ अचिं
त्यशक्तिरनघाद्भुतरूपाघहारिणी॥२०॥ अद्रिराज
सुताष्टांगयोगसिद्धिप्रदाच्युता॥ अक्षुण्णशक्तिरसु
दानंततीर्थामृतोदका॥२१॥ अनंतमहिमापारानंत
सौख्यप्रदान्नदा॥ अशेषदेवतामूर्त्तिरघोरामृतरू
पिणी॥२२॥ अविद्याजालशमनीह्यप्रतर्क्यगतिप्र
दा॥ अशेषविघ्नसंहर्त्रीत्वशेषगुणगुंफिता॥२३॥

अज्ञानतिमिरज्योतिरनुग्रहपरायणा॥अभिरामा
नवद्यांग्यनंतसाराकलंकिनी॥२४॥आरोग्यदानं
दवल्लीत्तापन्नार्त्तिविनाशिनी॥आश्चर्यमूर्त्तिरायुष्या
ह्याद्याढ्याद्यार्यसेविता॥२५॥आप्यायन्याप्तविद्या
ख्यात्वानंदाश्वासदायिनी॥आलस्यघ्नापदांहंत्रीह्या
नंदामृतवर्षिणी॥२६॥इरावतीष्टदात्रीष्टात्विष्टा ४
पूर्त्तफलप्रदा॥इतिहासश्रुतीड्यार्थात्विहामुत्रशु

भप्रदा॥२७॥इज्याशीलसमीज्येष्ठात्विंद्रादिपरिवं
दिता॥इलालंकारमालेद्धात्विंदिरारम्यमंदिरा॥
॥२८॥इदिंदिरादिसंसेव्यात्वीश्वरीश्वरवल्लभा॥
ईतिभीतिहरेड्याचत्वीडनीयचरित्रभृत्॥२९॥उ
त्कृष्टशक्तिरुत्कृष्टोडुपमंडलचारिणी॥उदितांबर
मार्गोस्त्रोरगलोकेविहारिणी॥३०॥उक्षोर्वरोत्पलोत्
कुंभाउपेंद्रचरणद्रवा॥उदन्वत्सूर्त्तिदेउद्योदारोत्सा

हृत्रवर्द्धिनी॥३१॥उद्वेगघ्नुल्लशमनी उष्णरश्मिसुता
प्रिया॥उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी॥
॥३२॥ऊर्ज्जं वहंत्यूर्ज्जधरोर्ज्जावती चोर्म्मिमालिनी॥ऊ
र्द्ध्वरेतःप्रियोर्द्ध्वाद्ध्वा ऊर्म्मिजोर्द्ध्वगतिप्रदा॥३३॥ऋषिवृं
दस्तुतर्द्धिश्च ऋणत्रयविनाशिनी॥ऋतंभरर्द्धिदा
वीचक्रकस्वरूपा ऋजुप्रिया॥३४॥ऋक्षमार्गवहर्क्षा ५
र्चिऋजुमार्गप्रदर्शिनी॥एधिताखिलधर्मार्था त्वेकै

कामृतदायिनी॥३५॥एधनीयस्वभावैष्टा त्वेजिता
शेषपातका॥ऐश्वर्यदैश्वर्यरूपा ह्यैतिह्यं ह्यैंदवी द्यु
तिः॥३६॥ओजस्विन्योषधी क्षेत्रमोजोदौदनदायिनी
॥ओष्ठामृतौन्नत्यदात्री त्वौषधं भवरोगिणां॥३७॥
औदार्यचंचुरौपेंद्री त्वौग्री ह्यौमेयरूपिणी॥अंबराध्व
वहांबष्टांबरमालांबुजेक्षणा॥३८॥अंबिकांबुमहा
योनिरंधोदांधकहारिणी॥अंशुमाला ह्यंशुमती त्वं

कीकृतषडानना॥३९॥ अंधनामिश्रहंत्र्यंधुरंजना
ह्यंजनावती॥ कल्याणकारिणीकाम्याकमलोत्प
लगंधिनी॥४०॥ कुमुद्वतीकमलिनीकांतिःकल्पि
तदायिनी॥ कांचनाक्षीकामधेनुःकीर्त्तिकृत्क्लेश
नाशिनी॥४१॥ क्रतुश्रेष्ठाक्रतुफलाकर्मबंधविभे
दिनी॥ कमलाक्षीक्लमहराकृशानुतपनद्युतिः। ६
॥४२॥ करुणार्द्राचकल्याणीकलिकल्मषनाशिनी॥

कामरूपाक्रियाशक्तिःकमलोत्पलमालिनी॥४३॥
कूटस्थाकरुणाकांताकूर्मयानाकलावती॥ कम
लाकल्पलतिकाकालीकलुषवैरिणी॥४४॥ कम
नीयलालाकलाकपर्दिस्तुकपर्दगा। कालकूटप्र
शमनीकदंबकुसुमप्रिया॥४५॥ कालिंदीकेलिल
लिताकलकल्लोलमालिका॥ क्रांतलोकत्रया
कंडूःकंडूतनयवत्सला॥४६॥ खड्गिनीखड्गधारा

भा खगा खंडेंदुधारिणी ॥ खेखेलगामिनी खस्था खं
डेंदुतिलकप्रिया ॥ ४७ ॥ खेचरी खेचरीवंद्या ख्यातिः
ख्यातिप्रदायिनी ॥ खंडितप्रणताघौघा खलबुद्धि
विनाशिनी ॥ ४८ ॥ खातैनःकंदसंदोहा खड्गखट्वांग
खेटिनी ॥ खरसंतापशमनी खनिः पीयूषपाथसां ॥
॥ ४९ ॥ गंगा गंधवती गौरी गंधर्वनगरप्रिया ॥ गंभी ७
रांगी गुणमयी गतातंका गतिप्रिया ॥ ५० ॥ गणनाथां

बिकागीता गद्यपद्यपरिष्टुता ॥ गंधारी गर्भशमनी
गतिभ्रष्टगतिप्रदा ॥ ५१ ॥ गोमती गुह्यविद्या गौर्गोप्त्री
गगनगामिनी ॥ गोत्रप्रवर्द्धिनी गुण्या गुणातीता गुणा
ग्रणीः ॥ ५२ ॥ गुहांबिका गिरिसुता गोविंदांघ्रिसमु
द्भवा ॥ गुणनीयचरित्रा च गायत्री गिरिशप्रिया ॥ ५३ ॥
गूढरूपा गुणवती गुर्वी गौरववर्द्धिनी ॥ ग्रहपीडाह
रा गुंद्रा गरघ्नी गानवत्सला ॥ ५४ ॥ घर्महंत्री घृतवती

घनतुष्टिप्रदायिनी ॥ घंटारवप्रिया घोराघौघविध्वंस
कारिणी ॥ ५५ ॥ घ्राणतुष्टिकरी घोषा घनानंदा घनप्रि
या ॥ घातुका घूर्णितजला घृष्टपानकसंततिः ॥ ५६ ॥ घ
टकोटिप्रपीना पापघटिताशेषमंगला ॥ घृणावती घृणि
निधिर्घस्मरा घूकनादिनी ॥ ५७ ॥ घुसृणपिंजरतनु
र्घर्घरी घर्घरस्वना ॥ चंद्रिका चंद्रिकांतांबुस्वंचला ८
पावकछतिः ॥ ५८ ॥ चिन्मयी चितिरूपा च चंद्रायुत

सितानना ॥ चांपेयलोचना चारुश्चार्वंगी चारुगामि
नी ॥ ५९ ॥ चर्य्या चारित्रनिलया चित्रकृच्चित्ररूपिणी ॥
चंपूचंदनगुच्छांबुच्चर्चनीया चिरस्थिरा ॥ ६० ॥ चारु
चंपकमालाढ्या चरिनाशेषदुष्कृता ॥ चिदाकाशवदा
चिंत्या चंचच्चामरवीजिता ॥ ६१ ॥ चोरितानेकवृजिना
चरिताशेषमंडला ॥ छेदिताखिलपापौघा छद्मघ्नी
छलहारिणी ॥ ६२ ॥ छन्नत्रिविष्टपतला छोटिताशेषबं

धना।छुरितामृतझरौघा छानैनाः छंदगामिनी॥६३॥
छत्रीकृतमरालौघा छटीकृतनिजामृता।जाह्नवीज्या
जगन्माता जप्याजंघाजवीचिका॥६४॥ जयाजना
र्दनप्रीता जुषणीया जगद्धिता।जीवनंजीवनप्राणा
जगज्ज्येष्ठा जगन्मयी॥६५॥ जीवजीवातुजनिका ज
न्मिजन्मनिबर्हिणी।जाड्यविध्वंसनकरी जगद्योनि ९
र्जलाविला॥६६॥ जगदानंदजननी जलजा जलजे

क्षणा।जललोचनपीयूषा जटाजूटविहारिणी॥६७॥
जयंती जंजपूकघ्नी जनितज्ञानविग्रहा।झल्लरीवा
द्यकुशला झलज्झालज्झलावृता॥६८॥ झंटीशवंद्या झं
कारकारिणी झर्झरावती॥टीकिताखिलपाताला टंकि
कैनोड्डिपातने॥६९॥ टंकारनृत्यकल्लोला टीकनीय
महातटा॥डंबरप्रवहाडीनराजहंसकुलाकुला॥७०॥
डमड्डमरुहस्ता च डामरोक्तमहांडका॥ढौकिताशेष

निर्वाणढक्कानादचलज्जला ॥७१॥ ढुंढिविघ्नेशजननी ढ
णड्ढुणितपातका ॥ तर्पणी तीर्थतीर्था च त्रिपथा त्रिद
शेश्वरी ॥७२॥ त्रिलोकगोप्त्री तोयेशी त्रैलोक्यपरिवंदि
ता ॥ तापत्रितयसंहर्त्री तेजोबलविवर्द्धनी ॥७३॥ त्रि
लक्ष्या तारणी तारा तारापतिकरार्चिता ॥ त्रैलोक्यपा
वनी पुण्या तुष्टिदा तुष्टिरूपिणी ॥७४॥ तृष्णाछेत्री ती १०
र्थमाता त्रिविक्रमपदोद्भवा ॥ तपोमयी तपोरूपा तप

स्तोमफलप्रदा ॥७५॥ त्रैलोक्यव्यापिनी तृप्तिस्तृप्तिकृत्
त्त्वरूपिणी ॥ त्रैलोक्यसुंदरी तुर्या तुर्यातीतफलप्रदा
॥७६॥ त्रैलोक्यलक्ष्मीस्त्रिपदी तथ्या तिमिरचंद्रिका ॥
तेजोगर्भा तपःसारा त्रिपुरारिशिरोगृहा ॥७७॥ त्रयी
स्वरूपिणी तन्वी तपनांगजभीतिनुत् ॥ तरिस्तरणि
जा मित्रं तर्पिताशेषपूर्वजा ॥७८॥ तुलाविरहिता तीव्रपा
पतूलतनूनपात् ॥ दरिद्रदमनी दक्षा दुःप्रेक्ष्या दिव्य

तार

मंडजा॥७९॥दीर्घावलीदुरावाप्याद्राक्षामधुरवारि

भृत्॥दर्शितानेककुतुकादुष्टदुर्ज्ञेयदुःखकृत्॥

८०॥दैन्यहृत्दुरितघ्नीचदानवारिपदाब्जगा॥दंद

शूकविषघ्नीचदारितायोघसंततिः॥८१॥द्रुरादेव

द्रुमच्छिन्नादुर्वाराघविघातिनी॥दमग्राह्यादेवमाता

देवलोकप्रदर्शिनी॥८२॥देवदेवप्रियादेवीदिक्पाल ११

पददायिनी॥दीर्घायुःकारिणीदीर्घदोग्ध्रीदूषणवर्जि

ता॥८३॥दुग्धंस्नुवाहिनीदोह्यादिव्यादिव्यगतिप्रदा।

द्युनदीदीनशरणंदेहिदेहनिवारिणी॥८४॥द्राघीयसी

दाघहंत्रीदितपातकसंततिः॥दूरदेशांतरचरीदुर्ग

मादेववल्लभा॥८५॥दुर्वृत्तघ्नीदुर्विगाह्यादयाधाराद

दा ५ यावती॥दुरासदानशीलाद्राविणीद्रुहिणस्तुता॥८६॥

दैत्यदानवसंशुद्धिकर्त्रीदुर्बुद्धिहारिणी॥दानसाराद

यासाराद्यावाभूमिविगाहिनी॥८७॥दृष्टादृष्टफलप्रा

त्रिदेवतावृंदवंदिता॥दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया
दुरालभा॥८८॥दंडयित्री दंडनीतिर्दुष्टदंडधरार्चि
ता॥दुरोदरघ्नी दावार्चिर्द्रवद्व्यैकशेवधिः॥८९॥
दीनसंतापशमनी दात्री दवथुवैरिणी॥दरीविदार
णपरा दांता दांतजनप्रिया॥९०॥दारितादितटा
दुर्गा दुर्गारण्यप्रचारिणी॥धर्मद्रवा धर्मधरा धेनु १२
धरा धृतिर्ध्रुवा॥९१॥धेनुदानफलस्पर्शा धर्मका

मार्थमोक्षदा॥धर्मोर्मिवाहिनी धुर्या धात्री धात्री विभू
षणा॥९२॥धर्मिणी धर्मशीला च धन्वी कोटीकृताव
ना॥ध्यातृपापहरा ध्येया धावती धूतकल्मषा॥९३॥
धर्मधरा धर्मसारा धनदा धनवर्धिनी॥धर्माधर्मगु
णच्छेत्री धत्तूरकुसुमप्रिया॥९४॥धर्मेशी धर्मशास्त्र
ज्ञा धनधान्यसमृद्धिकृत्॥धर्मलभ्या धर्मजाया ध
र्मप्रसवधर्मिणी॥९५॥ध्यानगम्यस्वरूपा च धरणी धा

नृपूजिता ॥ धूर्जटिजटासंस्था धन्या धीर्धारणाव
ती ॥ ९६ ॥ नंदा निर्वाणजननी नंदिनी नुन्नपातका ॥ नि
षिद्धविघ्ननिचया निजानंदप्रकाशिनी ॥ ९७ ॥ नभो
गणचरी नूतिर्नम्या नारायणी नुता ॥ निर्मला निर्म
लाख्याना नाशिनी तापसंपदां ॥ ९८ ॥ नियता नित्य
सुखदा नानाश्चर्यमहानिधिः ॥ नदीनदसरोमाता
नायिका नाकदीर्घिका ॥ ९९ ॥ नष्टोद्धरणधीरा च १२

नंददानंददायिनी ॥ निर्णिक्ताशेषभुवना निःसंगा
निरुपद्रवा ॥ १०० ॥ निरालंबा निःप्रपंचा निर्णाशित
महामला ॥ निर्मलज्ञानजननी निःशेषप्राणिताप
हृत् ॥ १०१ ॥ नित्योत्सवा नित्यतृप्ता नमस्कार्या निरंज
ना ॥ निष्ठावती निरातंका निर्लेपा निश्चयात्मिका ॥ १०२ ॥
निरवद्या निरीशा च नीललोहितमूर्धगा ॥ नंदिभृंगि
गणस्तुत्या नागा नंदा नगात्मजा ॥ १०३ ॥ निःप्रत्यूहा ना

नैकनदीनिरयार्णववदीर्घनौः॥पुण्यप्रदापुण्यगात्री
पुण्यपुण्यतरंगिणी॥१०४॥पृष्णुःपृष्णुफलापूर्णप्र
णतार्त्तिप्रभंजनी।प्राणदाप्राणिजननीप्राणेशी
प्राणरूपिणी॥१०५॥पद्मालयापराशक्तिःपुरजि
त्परमप्रिया॥परापराफलप्राप्तिःपावनीचपयस्वि
नी॥१०६॥परानंदाप्रकृष्टार्थाप्रतिष्ठापालनीपरा॥ १५
पुराणपठितापीनाप्रणवाक्षररूपिणी॥१०७॥पार्व

तीप्रेमसंपन्नापशुपाशविनाशिनी॥परमात्मस्वरू
पाचपरब्रह्मप्रकाशिनी॥१०८॥परमानंदनिस्पंदा
प्रायश्चित्तस्वरूपिणी॥पानीयरूपनिर्वाणपरित्रा
णपरायणा॥१०९॥पापेंधनदवज्वालापापारिःपा
पनामनुत्॥परमैश्वर्यजननीप्रज्ञाप्राज्ञापरावरा।
॥११०॥प्रत्यक्षलक्ष्मीःपद्माक्षीपरव्योमामृतस्रवा
॥प्रसन्नरूपाप्रणिधिःपूताप्रत्यक्षदेवता॥१११॥पि

नाकीपरमप्रीतापरमेष्ठीकमंडलुः॥पद्मनाभप्रदाया
तःप्रसुतापद्ममालिनी॥११२॥परर्द्धिदापुष्टिकरीप
थ्यामूर्त्तिःप्रभावती॥पूतानापीतगर्भघ्नीपापपर्वत
नाशिनी॥११३॥फजिनीफजदस्याचफुल्लांबुजविलो
चना॥फजितैनोमहादैत्याफणिलोकविभूषणं॥११४॥
फेनच्छलप्रणष्टैनाफुल्लकैरवगंधिनी॥फेनिलाच्छां १५
बुधारानाफुटुच्चाटितपातका॥११५॥फाणितस्वादु
सजिलाफांटपथ्यजलाविता॥विश्वमाताचविश्वेशी
विश्वाविश्वेश्वरप्रिया॥११६॥ब्रह्मण्याब्रह्मकृद्ब्राह्मी
ब्रह्मिष्ठाविमलोदका॥विभावरीचविरजाविक्रांता
नेकविग्रहा॥११७॥विश्वामित्रंविष्णुपदीवैष्णवीवैष्ण
वप्रिया॥विरूपाक्षप्रियकरीविभूतिर्विश्वतोमुखी
॥११८॥विपाशावेष्टबुधीविद्यावैदाक्षररसस्त्रवा॥वि
द्यावेगवतीवंद्याबृहणीब्रह्मवादिनी॥११९॥वरदा

विश्वस्रष्टाचवरिष्टाचविशोधनी॥विद्याधरीविशोका
चवयोवृंदनिषेविता॥२०॥बहूदकाबलवतीव्यो
मस्थाविबुधप्रिया॥वाणीवेदवती॥वित्ताब्रह्मविद्यान
रंगिणी॥२१॥ब्रह्मांडकोटिव्याप्तांबुब्रह्महत्यापहा
रिणी॥ब्रह्मेशविष्णुरूपाचबुद्धिर्विभववर्द्धिनी॥२२॥
विलासिसुखदावश्याव्यापिनीचवृषारणिः॥वृषांक १६
मौलिनिलयाविपन्नार्त्तिप्रभंजिनी॥२३॥विनीतावि

नतावध्वतनयाविनयान्विता॥विपंचीवाद्यकुशला
वेणुश्रुतिविचक्षणा॥२४॥वर्चस्करीबलकरीबलो
न्मूलितकल्मषा॥विपाप्माविगतातंकाविकल्पप
रिवर्ज्जिता॥२५॥वृष्टिकर्त्रीवृष्टिजलाविधिविछिन्न
बंधना॥व्रतरूपावित्तरूपाबहुविघ्नविनाशकृत्॥
॥२६॥वसुधारावसुमतीविचित्रांगीविभावसुः॥वि
जयाविश्वबीजंचवामदेवीवरप्रदा॥२७॥वृषाश्रि

तारुषग्रीवविज्ञानोर्म्यश्रमालिनी॥ भव्यभोगवतीभ
द्राभवानी भूतभाविनी॥२८॥ भूतधात्री भयहरा भ
क्तदारिद्र्यघातिनी॥ भुक्तिमुक्तिप्रदा भेशी भक्तस्व
र्गापवर्गदा॥२९॥ भागीरथी भानुमती भाग्यं भोग
वती भृतिः॥ भवप्रिया भवद्वेष्ट्री भूतिदा भूतिभूषणा
॥३०॥ भालजोचनभावज्ञा भूतभव्यभवत्प्रभुः॥ भ्रां ७
तिज्ञानप्रशमनी भिन्नब्रह्मांडमंडपा॥३१॥ भूरिदा

भक्तिसुलभा भाग्यवद्दृष्टिगोचरा॥ भंजितोपप्लव
कुला भक्ष्यभोज्यसुखप्रदा॥३२॥ भिक्षणीया भिक्षु
माता भावा भावस्वरूपिणी॥ मंदाकिनी महानंदा
माता मुक्तितरंगिणी॥३३॥ महोदया मधुमती म
हापुण्या मुदाकरी॥ मुनिस्तुता मोहहंत्री महातीर्था
मधुस्रवा॥३४॥ माधवी मानिनी मान्या मनोरथप
थातिगा॥ मोक्षदा मतिदा मुख्या महाभाग्यजनाश्रि

ना॥१३५॥महावेगवतीमेध्यामहामहिमभूषणा॥म
हाप्रभावामहतीमीनचंचललोचना॥१३६॥महा
कारुण्यसंपूर्णामहर्द्धिश्चमहोत्पला॥मूर्त्तिमन्मु
क्तिरमणीमणिमाणिक्यभूषणा॥१३७॥मुक्ताक
लापनेपथ्यामनोनयननंदिनी॥महापातकराशि
घ्नीमहादेवार्द्धहारिणी॥१३८॥महोर्मिमालिनीमु १८
क्तामहादेवीमनोन्मनी॥महापुण्योदयप्राप्यामा

यातिमिरचंद्रिका॥१३९॥महाविद्यामहामायाम
हामेधामहौषधी॥मालाधरीमहोपायामहोरग
विभूषणा॥१४०॥महामोहप्रशमनीमहामंगल
मंगलं॥मार्त्तंडमंडलचरीमहालक्ष्मीमदोज्झिता॥
॥१४१॥यशस्विनीयशोदाचयोग्यायुक्तात्मसेवि
ता॥योगसिद्धिप्रदायाज्यायज्ञेशपरिपूरिता॥
॥१४२॥यज्ञेशीयज्ञफलदायजनीयायशस्करी॥

यमिसेव्यायोगयोनिर्योगिनीयुक्तबुद्धिदा॥१४३॥यो
गज्ञानप्रदायुक्तायमाद्यष्टांगयोगयुक्।यंत्रिताघौ
घसंचारायमलोकनिवारिणी॥१४४॥यातायात
प्रशमनीयातनानामकृंतनी॥यामिनीशहिमा
छेदायुगधर्मविवर्जिता॥१४५॥रेवतीरतिसंदम्या
रत्नगर्भारमारतिः॥रत्नाकरप्रेमपात्रंरसज्ञारस १९
रूपिणी॥१४६॥रत्नप्रासादगर्भाचरमणीयतरंगि

णी॥रत्नार्चीरुद्ररमणीरागद्वेषविनाशिनी॥१४७॥र
मारामारम्यरूपारोगजीवातुरूपिणी॥रुचिकृद्रोच
नीरुच्यारुक्चिरारोगहारिणी॥१४८॥राजहंसारवव
तीराजत्कच्छोजराजिका॥रामणीयकरेखाचरु
जारीरोगशोषिणी॥१४९॥राकारंकार्त्तिशमनीरम्या
रोलंबराविणी॥रागिणीरंजितशिवारूपलावण्यशे
वधिः॥१५०॥लोकप्रसूर्लोकवंद्यालोलत्कच्छोलमा

लिनी॥लीलावतीलिंगभूमिर्लोकलोचनचंद्रिका
॥१५१॥लेखस्रवंतीलटनालघुवेगालघुत्वहृत्॥
लास्यत्तरंगहृल्लासाचललितालपन्नंगिका॥१५२॥
लोकबंधुर्लोकधात्रीलोकोत्तरगुणोर्जिता॥लो
कत्रयहितालोकालक्ष्मीर्लक्षणलक्षिता॥१५३॥
लीलालक्षितनिर्वाणलावण्यामृतवर्षिणी॥वैश्वा २०
नरीकासवेद्यावंध्यत्वपरिहारिणी॥१५४॥वासुदे

वांघ्रिरेणुघ्नीवह्निवक्त्रनिवारिणी॥शुभावतीशुभ
फलाशांतिःशंतनुवल्लभा॥१५५॥शूलिनीशैशव
वयाःशीतलामृतवाहिनी॥शोभावतीशीलवती
शोषिताशेषकिल्बिषा॥१५६॥शरण्याशिवदाशि
ष्टाशरजन्मप्रसूःशिवाशक्तिःशशांकविमला
शमनस्वसृसंमता॥१५७॥शामाशमनमार्गघ्नीशि
तिकंठमहाप्रिया॥शुचिःशुचिकरीशेषाशेषशायि

पदोद्भवा॥५७॥श्रीनिवासाकृतिःश्रद्धाश्रीमतीश्री
शुभावती॥शुद्धविद्याशुभावर्त्ताश्रुतानंदाश्रुति
स्तुतिः॥५९॥शिवेतरघ्नीशबरीशांबरीरूपधा
रिणी॥श्मशानशोधनीशांनाशश्वच्छतधृतिष्टु
ता॥६०॥शालिनीशालिशोभाढ्याशिखिवाहनग
र्भभृत्॥शंसनीयचरित्राचशांनिताशेषपातका २१
॥६१॥षड्गुणैश्वर्यसंपन्नाषडंगश्रुतिरूपिणी॥षंढ

ताहारिसलिजास्त्यापन्नदनदीशता॥६२॥सरिद्व
राचसुरसासुप्रभासुरदीर्घिका॥स्वःसिंधुःसर्वदुः
खघ्नीसर्वव्याधिमहौषधी॥६३॥सेव्यासिद्धिःसती
सूक्तिःस्कंधसूश्चसरस्वती॥संपत्तरंगिणीस्तुत्या
स्थाणुमौलिकृतास्पदा॥६४॥स्थैर्यदासुभगासौ
ख्यास्त्रीषुसौभाग्यदायिनी॥स्वर्गनिःश्रेणिकासू
क्ष्मास्वधास्वाहासुधाजला॥६५॥समुद्रपूरणीः

स्वर्ग्या सर्वपातकवैरिणी ॥ स्मृताघहारिणी सीना सं
साराब्धितरंडिका ॥ १६६ ॥ सौभाग्यसुंदरी संध्या स
र्वसारसमन्विता ॥ हरप्रिया हृषीकेशी हंसरूपा हि
रण्मयी ॥ १६७ ॥ कृताघसंघघातितकृद्वेजाद्वेजाघग
र्भहंत्री ॥ हृष्टा हृष्टिप्रदा ह्लादा ह्लींकारा हृदयंगमा ॥ १६८ ॥
हिमाचलसुता हैमी हृषीकेशपदोद्भवा ॥ हेम्या हां २२
तिः हेमाधारा हितिभूषा हेममिश्रिता ॥ १६९ ॥ हेमप्र

२३ १७०

काशिता घोषा रुद्रविद्राविणी क्षमा ॥ इति नाम स
हस्त्रं हि गंगायाः कलशोद्भव ॥ कीर्तयित्वा नरः सम्य
ग्गंगास्नानफलं लभेत् ॥ १७० ॥ सर्वपापप्रशमनं सर्व
विघ्नविनाशनं ॥ सर्वस्तोत्रजपाच्छ्रेष्टं सर्वपावनपा
वनं ॥ १७१ ॥ श्रद्धयाभीष्टफलदं चतुर्वर्गसमृद्धिकृत् ॥
सकृज्जपादवाप्नोति ह्येककृतफलं मुने ॥ १७२ ॥ स
र्वतीर्थेषु यः स्नातः सर्वयज्ञेषु दीक्षितः ॥ तस्य यत्फ

लमुद्दिश्यत्रिकालजपठनाच्चनन्॥७३॥सर्वत्रनेभ्रुपत्
पुण्यंसम्यक्कीर्णेषुवाडव॥लक्षजंसमवाप्नोतित्रि
संध्यंनियतःपठेत्॥७४॥स्नानकालेपठेद्यस्तुयत्र
कुत्रजलाशये॥तत्रसन्निहितानूनंगंगात्रिपथगा त्रिप ४
मुने॥७५॥श्रेयोर्थीलभतेश्रेयोधनार्थीलभतेध
नं॥कामीकामानवाप्नोतिमोक्षार्थीमोक्षमाप्नुया २२
त्॥७६॥वर्षंत्रिकालजपनाच्छ्रद्धयाशुचिमानसः॥

ऋतुकालाभिगमनात्पुत्रःपुत्रवान्भवेत्॥७७॥
नाकालमरणंतस्यनाग्निचौरादिसाध्वसं॥नाम्नां
सहस्रंगंगायायोजपेच्छ्रद्धयामुने॥७८॥गंगाना
मसहस्रंतुजप्त्वाग्रामांतरंव्रजेत्॥कार्यसिद्धिम
वाप्नोतिनिर्विघ्नोगेहमाविशेत्॥७९॥तिथिवार
र्क्षयोगानांनदोषःप्रभवेत्तदा॥यदाजप्त्वाव्रजे
देतत्स्तोत्रंग्रामांतरंनरः॥८०॥आयुरारोग्यजन

नंसर्वोपद्रवनाशनं॥सर्वसिद्धिकरंपुंसांगंगा
नामसहस्रकं॥२१॥जन्मांतरसहस्रेषुयत्पाप
सम्यगर्जितं॥गंगानामसहस्रस्यजपनात्तक्ष
यंव्रजेत्॥२२॥ब्रह्मघ्नोमद्यपःस्वर्णस्तेयीचगु
रुतल्पगः॥तत्संयोगीभ्रूणहंतामातृहापितृहा
नथा॥२३॥विश्वासघातीगरदःकृतघ्नोमित्रघा २४
नकः॥अग्निदोगोवधकरोगुरुद्रव्यापहारकः॥२४॥

पु
घु

महापातकयुक्तोपिसंयुक्तोप्युपपातकैः॥मुच्य
तेश्रद्धयाजप्त्वागंगानामसहस्रकं॥२५॥आधि
व्याधिपरिक्षिप्तोघोरतापपरिप्लुतः॥मुच्यतेस
र्वदुःखेभ्यःस्तवस्यास्यानुकीर्त्तनात्॥२६॥सं
वत्सरेणयुक्तात्मापठन्भक्तिपरायणः॥अभी
प्सितांजन्मेसिद्धिंसर्वैःपापैःप्रमुच्यते॥२७॥
संशयाविष्टचित्तस्यधर्मविद्वेषिणोपिच॥दां

न्निकस्यापिहिंस्रस्यचेतोधर्मपरंभवेत्॥१८८॥वर्णा
श्रमपथीनस्तुकामक्रोधविवर्जितः॥यत्फलंलभते
ज्ञानीतदाप्नोत्यस्यकीर्त्तनात्॥१८९॥गायत्र्ययुत
जाप्येनयत्पुण्यंसमुपार्जितं॥सद्यस्तत्ननतःसम्य २४
कृतदर्शेषमवाप्नुयात्॥१९०॥गांदत्वावेदविदुषेय
त्पुण्यंजायतेसती॥तत्पुण्यंसम्यगाख्यातंस्तवराज्ञ २५
सकृज्जपात्॥१९१॥गुरुशुश्रूषणंकुर्वन्यावज्जीवं

नरोत्तमः॥यत्पुण्यमर्जयेतद्वाकृवर्षंत्रिषवणंप्लव
न्॥१९२॥वेदपारायणात्पुण्यंयदत्रपरिपठ्यते॥न
त्पुण्यमासेनजप्येतत्रिसंध्यंपरिकीर्त्तनात्॥१९३॥
गंगायास्तवराजस्यप्रत्यहंपरिशीलनात्॥शिव
भक्तिमवाप्नोतिविष्णुभक्तोथवाभवेत्॥१९४॥य
कीर्त्तयेदनुदिनंगंगानामसहस्रकं॥तत्समीपेसहच
रीगंगादेवीसदाभवेत्॥१९५॥सर्वत्रपूज्योभवति

सर्वत्रविजयीभवेत्॥सर्वत्रसुखमाप्नोतिगाङ्गवी
स्तोत्रपाठतः॥१९६॥सदाचारीचविज्ञेयःसशुचि
श्चसदैवहि॥सतुसर्वसुरार्च्यःसकीर्तयेद्यइमां
स्तुतिं॥१९७॥तस्मिंस्तुष्टेभवेत्तुष्टागाङ्गवीनात्रसं
शयः॥तस्मात्सर्वप्रयत्नेनगंगाभक्तंतमर्चयेत्
॥१९८॥स्तवराजमिमंगांगंशृणुयाद्यश्चवापठेत्। २६
श्रावयेदथतद्भक्तान्दंभलोभविवर्जितः॥१९९॥

मुच्यतेत्रिविधैःपापैर्मनोवाक्कायसंभवैः॥क्षणा
न्निःपापतामेतिपितॄणांचप्रियोभवेत्॥२००॥सर्व
देवप्रियश्चापिसर्वर्षिगणसंमतः॥अंतेविमान
मारुह्यदिव्यस्त्रीशतसंवृतः॥२०१॥दिव्याभरणसं
पन्नोदिव्यभोगसमन्वितः॥नंदनादिवनेस्वैरंदेव
वत्सप्रमोदते॥२०२॥भुंजानेषुचविप्रेषुश्राद्धकाले
विशेषतः॥जपन्निदंमहास्तोत्रंपितॄणांतृप्तिकारणं।

॥२०३॥यावंतितत्रसिक्थानियावंतोंबुकणास्थिताः॥
तावंत्येवहिवर्षाणिमोदंतेस्वपितामहाः॥२०४॥यथा
प्रीणंतिपितरोगयायांपिंडदानतः॥तथैवतृप्नुयुः
स्या ४ श्राद्धेस्तवस्यास्यतुसंभवान्॥२०५॥एतत्स्तोत्रंगृहेय
त्रलिखितंपरिपूज्यते॥तत्रपापभयंनास्तिशुचि
तद्भवनंसदा॥२०६॥अगस्तोकिंबहूक्तेनशृणुमे २७
निश्चितंवचः॥संशयोनात्रकर्तव्यःसंदिग्धरिफलं

नहि॥२०७॥यावंतिमर्त्यस्तोत्राणिमंत्रजातान्यनेकशः॥
तावंतिस्तवराजस्यगांगेयस्यसमानिन॥२०८॥या
वज्जन्मजपेद्यस्तुनाम्नामेतत्सहस्रकं॥सकीटकेष्व
पिमृतोनपुनर्गर्भमाविशेत्॥२०९॥नित्यंनियमवा
नेनयोजपेत्स्तोत्रमुत्तमं॥अन्यत्रापिविपन्नःसगं
गातीरेमृतोभवेत्॥२१०॥एतत्स्तोत्रवरंपुण्यंपुराप्रो
क्तंपिनाकिना॥विष्णवेनिजभक्तायमुक्तिबीजाक्षरं।

स्पदं ॥२११॥ गंगास्नानप्रतिनिधिस्तोत्रमेतन्मयेरि
तं ॥ सिस्नासुर्जाह्नवी तस्मादेतत्स्तोत्रं जपेत्सुधीः॥
॥२१२॥ ॥इति श्रीस्कंदपुराणे काशीखंडे गंगास
हस्रनामैकोनत्रिंशोऽध्यायः॥ ॥श्रीरस्तु॥ ॥
॥ ॥शुभं भवतु॥ ॥लेखकपाठकयोः कल्याणं
भूयात्॥ ॥श्री॥ ॥ ङ् ॥श्री॥ ॥श्री॥ ॥
इदं मे गंगे यमुने स॰या ॥ अ सिक्नियाम॰मया ॥ सि
ता सिते॰ तं ति ॥ येवैतन्वं॰ जैने ॥ स्त चर ॥ पावका॰वता
यन्यंवं॰वसुः॥